३।१।१३५। इति कः।) कालविशेषः। चक्षुर्निमीलनम्। इति मेदिनी। षे, ३६॥ (यथा, महाभारते।६।१८६।१६।

"सन्ध्यञ्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्द्धसंख्यान्॥"

वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।

"निमेषणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः।
चालयेदतिवर्त्मानि निमिषः स गदो मतः॥")

निमीलनं, क्ली, (निमील्यतेऽनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः।३।२४२॥ (यथा, कलाविलासे।१।४१।

"नयननिमीलनमलः सुचिरं स्नानार्द्रचूलजलसिक्तः।
दम्भतरुः शुचिकुसुमः सुखशतशाखाशतैः फलितः॥"

कालविशेषः। यथा, सूर्य्यसिद्धान्ते।४।१०।

"तद्वदेव विमर्दार्द्धनाड़िकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्।६।७३।

"नीतश्च मकरेशत्वं वेलावित्तस्य भूभुजा।
देवीः कामयमानस्य चक्रे गजनिमीलिका॥")

निमीलनञ्च॥

निमेयः, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३।१।९७। इति यत्। "ईद्यति।" ६।४।६५। इति ईत्।) नैमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते।१३।५१।८।

"नाहं शतसहस्रेण निमेयः पार्थिवर्षभ!।
दीयतां सदृशं मूल्यममात्यैः सह चिन्तय॥")

निमेषः, पुं, (नि+मिष+भावे घञ्।) पक्ष्मस्पन्दनकालः। पलक् इति भाषा॥ तत्पर्य्यायः। निमिषः २ दृष्टिनिमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावत्कालमक्लिष्टमनसैव विकाशानन्तरं पक्ष्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥

"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः॥"
इत्यग्निपुराणम्॥

(पक्ष्मस्पन्दनम्। यथा, रघुः।२।१९।

"पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्॥"

रोगविशेषः। यथा, सुश्रुते चिकित्सितस्थाने १९ अध्याये।

"नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरम्।
लभते दन्तचालञ्च तांस्तांश्चाप्यानुपद्रवान्॥"

स्वनामख्यातयक्षविशेषः। इति नीलकण्ठः॥ यथा, महाभारते।१।३२।१९।

"उलूकश्वसनाभ्याञ्च निमेषेण च पक्षिराट्।
प्ररुजेन च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणकार्य्यं यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं व्याप्य रोचते दीप्यते इति। रुच् दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्नं, त्रि, निकृष्टा म्ना अभ्यासः शीलमस्य। (यद्वा, निकृष्टं म्नातीति। म्ना+कः।) नीचम्। निचु इति नावाल इति च भाषा॥ तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः।१।१०।१५॥ गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे।५।५।

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"

पुं, अनमित्रपुत्त्रः। स तु सत्राजितप्रसेनयोः पिता। यथा, भागवते।९।२४।१२।

"शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः।१।१०।३०॥ (यथा, मनुः।९।२२।

"यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥")

नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति स्वास्थ्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्द्दः ६। इत्यमरः।२।४।६२॥ अर्कपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरत्वचः ९ छर्द्दिघ्नः १०। इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कीरेष्टः १४ नेता १५ सुमनाः १६ विशीर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ शूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। कफव्रणक्रिमिवमिशोफशान्तिकारित्वम्। बलासबहुविधपित्तदोषहृदयविदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। ग्राहित्वम्। कटुपाकित्वम्। अग्निवातकारित्वम्। अहृद्यत्वम्। श्रमतृट्कासज्वरारुचिच्छर्द्दिकुष्ठहृल्लासमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। क्रिमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलगुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःक्रिमिमेहनाशित्वञ्च।

"निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत्।
अहृद्यः श्रमतृट्कासज्वरारुचिक्रिमिप्रणुत्॥
व्रणपित्तकफच्छर्द्दिकुष्ठहृल्लासमेहनुत्।
निम्बपत्रं स्मृतं नेत्र्यं क्रिमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठनुत्।
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःक्रिमिमेहनुत्॥"
इति भावप्रकाशः॥ *॥

तत्तैलगुणाः। नात्युष्णत्वम्। क्रिमिकुष्ठकफत्वग्दोषव्रणकण्डूतिशोफहारित्वम्। पित्तलत्वञ्च। इति राजनिर्घण्टः॥ *॥

"निम्बं पित्तकफच्छर्द्दिव्रणहृल्लासकुष्ठनुत्।"
निम्बपत्रं इति वा पाठः॥ *॥

"करञ्जनिम्बजफलं क्रिमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं क्रिमिहरं परम्॥"
इति राजवल्लभः॥

अथ महानिम्बः। बकाइन इति हिन्दीभाषा॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बरकः कार्म्मुकः क्षीर इत्यपि॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तक्रमिच्छर्द्दिकुष्ठहृल्लासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"

(षष्ठ्यां तिथौ तद्भक्षणे तिर्य्यग्योनित्वं स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब इव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्भक्षणनिषेधो यथा, तिथितत्त्वे।
"कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके॥")

निम्बतरुः, पुं, (निम्ब इव तरुर्वृक्षः।) मन्दारवृक्षः। इत्यमरः।२।४।२६॥

निम्बबीजः, पुं, (निम्बस्य बीजमिव बीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(म्बु)म्बूकं, क्ली, (निम्बति सिञ्चति रसैरिति। निम्ब सेचने+बाहुलकात् ऊकः पाक्षिको ह्रस्वश्च। ततः कन्।) वृक्षविशेषः। कागजी लेबु इति भाषा॥ तत्पर्य्यायः। अम्लजम्बीरः २ वह्निः ३ दीप्तः ४ वह्निबीजः ५ अम्लसारः ६ दन्ताघातः ७ शोधनः ८ जन्तुमारी ९ निम्बूः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"निम्बूः स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्त्तितम्॥")

तत्फलगुणाः। अम्लरसत्वम्। कटुत्वम्। उष्णत्वम्। गुल्मामवातकासकफार्त्तिकण्ठविच्छर्द्दिहरत्वम्। अग्निदृष्टिकारित्वम्। चक्षुष्यत्वम्। परिपक्वे अतीव रुच्यत्वञ्च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। क्रिमिसमूहोदरग्रहनाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफशूलिनो हितत्वम्। कष्टनष्टरुचिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीड़ितानां विषविक्लवानां मलग्रहे बद्धगुदे विसूचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥ *॥